| अथोपपातकानि । | प्रायश्चित्तानि । | तदशक्तौ धेनुदानम् । | तदशक्तौ चूर्णीदानम् । | दक्षिणा । |
|---|---|---|---|---|
| प्रायश्चित्तद्वयग्रहणम् । | त्रिसहस्रगायत्रीजपः मासैकं गोष्ठे पयःपानं वा । एतत् लघुतरपापप्रायश्चित्तद्वयग्रहणे । | ० | ० | ० |
| स्वभावाशास्त्रकृष्णाजिनोभयतोमुखीमण्यादिप्रतिग्रहः । | उत्तममण्यादिप्रतिग्रहे दशसहस्रगायत्रीजपः । मध्यमे पञ्चसहस्रगायत्रीजपः । अधमे अष्टोत्तरसहस्रसावित्रीजपः । द्वादशरात्रं पयोव्रतञ्च । अत्यन्तनिषिद्धकृष्णाजिनोभयतोमुखीप्रतिग्रहे लक्षगायत्रीजपः । | | | |
| अथ ब्राह्मणस्य क्षत्रियवैश्यवृत्त्या धनार्जनम् । | संवत्सरे चान्द्रायणम् । संवत्सराभ्यन्तरे मासैकद्विकादौ चान्द्रायणभागहारः कल्प्यः । संवत्सरादूर्द्ध्वं द्विगुणत्रिगुणादिकं कल्प्यम् । आपत्काले दोषाभाव. । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनव· । | २२॥० कार्षापणाः । | यथाशक्ति । |
| ब्राह्मणस्य सेवावृत्तिधनार्ज्जनम् । | प्राजापत्यत्रयं पुनरुपनयनञ्च । द्रव्यत्यागपूर्व्वकं करणीयम् । | ३ धेनवः । | ९ कार्षापणाः । | यथाशक्ति । |
| ब्राह्मणस्य गीतादिना धनार्जनम् । | चान्द्रायणम् । कृतप्रायश्चित्तस्याप्यव्यवहार्य्यत्वम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| ब्राह्मणस्य शूद्रसेवनम् । | चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | चिरतरकालाभ्यासे त्रैवार्षिकव्रतम् | ४५ धेनवः । | १३५ कार्षापणाः । | २५ गावः । अशक्तौ २५ कार्षापणाः । |
| अविक्रेयविक्रयः । ब्राह्मणस्याविक्रेयद्रव्याणि यथा । लवण पक्वान्न मधु क्षीर दधि घृतोदक सर्व्वगन्धोपल लाक्षा रक्तवासः गुड़ तैल ग्राम्यपशु एकशफ केश सर्व्वारण्यपशु विद्या याग खात गो शस्त्र ऊर्णा रस विष तिल शस्य नीली कौषेयवासः चर्म्म तक्राममांस सुरा सोम केश गोधूम कन्या हिङ्गु गुग्गुलु सर्जरस हरिताल मनःशिलाञ्जन गैरिक क्षार मणि मौक्तिक प्रवाल दन्त नख आर्द्रौषधि शुक्ति वेणु वैणव मृन्मयपात्र पुष्प मूल तुष कार्पास भस्मास्थि पिण्याक त्रपु सीसक कृष्णलोहोडुम्बर खड्गपात्राणि इत्यविक्रेयाणि । | सकृत्कृते त्रिरात्रोपवासः । | ० | १॥० कार्षापणः । | यथाशक्ति । |
| | द्विरभ्यासे प्राजापत्यम् । | १ धेनुः । | ३ कार्षापणाः । | यथाशक्ति । |
| | अत्यन्ताभ्यासे चान्द्रायणम् । | सार्द्धसप्तधेन्वसम्भवात् ८ धेनवः । | २२॥० कार्षापणाः । | यथाशक्ति । |
| | निखिलविक्रये बहुतरकालाभ्यासे वा त्रिषवणस्नानाधःशयनचतुर्थकालभोजनरूपसंवत्सरव्रतम् । शूद्रस्यात्यन्तापदि दोषाभावः । | १५ धेनवः । | ४५ कार्षापणाः । | ९ गावः । अशक्तौ २७ कार्षापणाः । |